रुद्रयामले तु मतं श्रीवासुदेवस्येति पाठः क्लीवत्वेन "आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः। पञ्चवर्षैर्भवेद्दीक्षा-ह्यागमोक्तैः शृणु प्रिये !। यां कृत्वा कलिकाले च सर्वाभीष्टं लभेन्नरः" तन्त्रसारे यामलम्" प्रसङ्गात् तन्त्ररूपागमस्य प्रामाण्यं तदुपासनादिषु कलौ अधिकारिविशेषस्य कर्त्तव्यता च प्रदर्श्यते। निजनिजकर्मवासनारूपपाशबद्धान् अनात्मज्ञान् जन्ममरणादिक्लेशभाजः संसारपारं गन्तुमसमर्थान् प्राणिनो विलोक्य परमेश्वरः वेदेन कर्मकाण्डोपासनाकाण्डब्रह्मकाण्डात्मकार्थान् समुपदिदेश। तत्र वेदानाम् उच्छिन्नप्रायतया क्रमशो रागबाहुल्येन तदुक्तधर्मेषु उच्छिन्नप्रायेषु सत्सु अनुच्छिन्नानामप्यर्थस्य दुर्मेधसामिदानीन्तनादीनां दुरधिगमतया आयासबाहुल्येन च तत्राप्रवर्त्तमानानां क्रमशोविलुप्तेषु श्रौतधर्म्मेषु कथङ्कारमुद्धारः स्यादित्याकलय्य कारुण्योदयेन वेदार्थप्रकाशनार्थं सुगमोपायेन जैमिनिव्यासनारदादिरूपोपाधिभिरुपहितः सन् तत्तद्ग्रन्थान् प्रणीतवान्। तत्र कर्म्मकाण्डार्थो जैमिना मन्वादिभिश्च सम्यक्तया व्याकृतः उपासनाकाण्डार्थः स्वयं शिवमूर्त्त्या तन्त्रशास्त्रं, नारदादिमूर्त्त्या च पञ्चरात्रादिकं विधाय विवृतः ब्रह्मकाण्डार्थश्च वेदव्यासमूर्त्त्येति विवेकः। ततश्च धर्मे वेदस्यैव स्वतःप्रमाणत्वेन वेदमूलकत्वादन्येषां प्रामाण्यं तत्र स्मृतीनामिव आगमस्यापि वेदमूलकत्वमनुमीयते। वेदएव रामतापनीयनृसिंहतापनीयाद्यात्मके आगमोक्तोपसनादिसंवादात् तन्मूलकत्वाधिगमात् येषां च मूलानि नाधिगम्यन्ते तेषामपि प्रामाण्यं स्मृति वाक्यवत् अनुमातव्यम् भ्रमप्रमादादिशून्यत्वहेतोः स्मृतिकर्त्तॄणामिव आगमकर्त्तुः शिवस्य सत्त्वात् तन्त्रवाक्यस्य स्मृतिवाक्यवत् प्रामाण्यम् न च बौद्धागमादिवत् विप्रलम्भकवाक्यत्वं रागद्वेषादेस्तस्मिन्नसत्त्वात्। तत्र कर्मकाण्डार्थे सर्वेषामपर्य्युदस्तानामधिकारः मुमुक्षोरपि तत्त्वज्ञानपर्य्यन्तं चित्तशोधनार्थं प्रत्यवायपरिहारार्थं च कर्म्मणां कर्त्तव्यतोपदेशात् "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन तपसेत्यादि" श्रुतेः "आरुरुक्षोर्मुनेर्योगम् कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते" गीतावाक्याच्च। ततोऽन्येषामपि ईश्वरार्पणेन फलानभिसन्धानेन च कृतानां कर्म्मणां बन्धाहेतुत्वात् क्रमशोमुक्तिः फलम्। एवमुपासनाकाण्डार्थेऽपि सर्वेषामधिकारः श्रुतौ तपसेति निर्द्देशात् "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत स क्रतुं कुर्व्वीतेति" श्रुत्या सोपाधिकस्येश्वरस्योपासनाविधानाच्च। उपासना च मानसी क्रिया ध्यानपरपर्य्याया तत्र निराकारस्य ब्रह्मणोऽसम्भवात् सोपाधिकेश्वरविषयैवोपासना कर्त्तव्या। सा च गुणोपाधिविशिष्टस्यैव तत्तदाकारोपहितस्यापि सम्भवति "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः। उपासकानां सिद्ध्यर्थं ब्रह्मणोरूपकल्पना" इत्युक्तेः। कल्पना च न स्वेच्छया किन्तु शास्त्रादिसिद्धैव। तथा चागमपुराणादिषु यानि यानि रूपाणि वर्णितानि तद्रूपेणैव उपासना कर्त्तव्या। ब्रह्मकाण्डार्थे तु कर्मभिश्चित्तशुद्धौ साकारोपासनेन तदैकाग्र्यवतः वेदान्तोक्तसाधनचतुष्टयवत एवाधिकार इति भेदः। तत्र तान्त्रिकोपासने कर्त्तव्येऽपि "देवोभूत्वा देवं यजेत्" इत्युक्तेः भूतशुद्ध्यादिना आत्मानं शोधयित्वा उपास्यदेवेनैकीभूतमात्मानं ध्यात्वैवोपासनं कार्य्यम् "अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मि न स वेद यथा पशुरेव स देवानामिति" श्रुत्या भेदेनोपासानाया निन्दनात् तान्त्रिकोपासनेऽपि कर्त्तव्ये वैदिककर्म्मसु सावित्रजन्मरूपोपनयनसंस्कारस्येव तन्त्रोक्तदीक्षायाएवाधिकारप्रयोजकत्वम् तत्र दीक्षायाञ्च सर्वेऽपि वर्णा अनुलोमप्रतिलोमजाश्चाधिकारिणः "मां हि पार्थ ! व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिमिति" गीतायां भगवदुपासने सर्वेषामधिकारस्य पतिपादनात्। अत्र "पुराणादौ कश्चित् विशेषो दर्शितः यथा "यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च। श्रुतिस्मृतिविरुद्धानि तेषां निष्ठा तु तामसी। करालभैरवञ्चापि यामलं वामसाश्रितम्। एवंविधानि चान्यानि मोहनार्थानि तानि तु। मया सृष्टानि चान्यानि मोहायैव भवार्णवे" इति देवीपुराणवचने वाममाश्रितमिति विशेषणात् श्रुतिस्मृति विरुद्धानीति निर्द्देशाच्च श्रुतिस्मृतिविरुद्धवाममार्गस्यैव निन्दनात् तत्रैवाधिकारिविशेषस्यानधिकारो न तु तन्त्रोक्तेष्वपि इतरांशेषु वेदाविरुद्धेषु इति निर्णयः। वस्तुतः "सौत्रामण्यां सुरां पिबेत्" इति श्रुत्या विहितस्य सौत्रमण्यां सुरासेवनस्येव वामदेवसामोपासकस्य "न काञ्चन परिहरेदिति" सर्व्वस्त्रीगमनस्येव अधिकारिविशेषविषये तस्यापि ग्राह्यता। अतएव मनुना "न मांसभक्षणे दोषो न मद्ये न च मैथुने। प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफलेति" सामा-